National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(57): 219-223
© 2024 NJHSR
www.sanskritarticle.com

**डॉ. लालसिंहपठानिया**
प्राचार्य: (प्र.),
सनातनधर्म-आदर्शसंस्कृतमहाविद्यालयः,
डोहगी, ऊना, हिमाचलप्रदेशः

**Correspondence:**
**डॉ. लालसिंहपठानिया**
प्राचार्य: (प्र.),
सनातनधर्म-आदर्शसंस्कृतमहाविद्यालयः,
डोहगी, ऊना, हिमाचलप्रदेशः

# रसस्यैतिह्यं वृत्तम्

**डॉ. लालसिंहपठानिया**

अलङ्कारशास्त्रेतिहासे आत्मतत्त्वमधिकृत्य अनेके विवादाः प्रचलिता अभवन्। केचन रस एव काव्यस्यात्मेति स्वीकुर्वन्ति। अन्ये अलङ्कारान्, इतरे ध्वनिम्, अपरे च वक्रोक्तिं काव्यात्मत्वेन उररीकुर्वन्ति। एते विवादा एव सम्प्रति अलङ्कारशास्त्रेतिहासे सम्प्रदायरूपेण प्रचलिताः सन्ति। एतेष्वन्यतमः रससम्प्रदायः। रसालङ्काकाररीत्यादयः काव्यसौन्दर्यसम्पदः निर्मातारः महत्त्वपूर्णा-न्युपकारणानि च सन्ति। इमानि खलु काव्यपुरुषोत्पत्तेः कारणानि ।

(क) **रसस्य प्रेरणास्रोतः** - रसशब्दो भारतीयसंस्कृतवाङ्मय-यस्यात्यन्तप्राचीनतमेषु शब्देष्वन्यतमः। प्राचीनकालतः शब्दोऽयं जल-सार-वीर्य-द्रव-स्वादविषादिरूपेषु, मधुरादिषड्-रसशृङ्गारादिकाव्यरस-सुराशोणितदेहादिविभिन्नार्थेषु च प्रयुज्यते ।[1]यथा -

**'रसः स्वादे जले वीर्यशृङ्गारादौ विषे द्रवे।**
**वोले रागे गृहधातौ तिक्तादौ पारदेऽपि च॥'**

आवैदिककालतो रसशब्दस्य महन्महत्त्वमास्ते। यतो हि वेदेष्वस्य विषयस्य विवेचनमुपलभ्यते। वेदेषु रसराजशृङ्गारस्य चर्चा अनेकेषु मन्त्रांशेषु दृग्गोचरी भवति । यथा - **'आजाया युवतेपति, परिहाय रसं दुहे ।'**[2] इत्यत्र रसः सुकृतजन्यसुखस्य द्योतकं खलु। यथा - **'ऋषिभिः संभृतरसम् ।'**[3] एवमेव -**'धनञ्जयः पवते कृत्यो रसो विप्रः कविकाव्येन'**[4] अपि च - **'यो वः शिव तमो रसः'**[5] मन्त्रेऽस्मिन् काव्यरसस्य आनन्दमयत्वस्य बीजमनुमीयते ।

उपर्युक्तकतिपयैरुद्धरणैर्निश्चीयते चेदृग्वेदे रसशब्दस्यान्वितिः रसमतिरिच्य वाग्रसरूपे उत वा काव्यरसरूपे अप्यभूत् । एवमेव यजुस्सामाथर्ववेदेष्वपि रसशब्दस्य प्रयोगः पूर्वोक्तार्थेषु समुपलभ्यते। यथा - **'नमो वः पितरो रसाय'**[6] इत्यत्र रसशब्दो वसन्तर्तुर्वाचको मध्वादिरसाः वसन्ततौं एव प्रादूर्भूयन्ते। एतस्मात्कारणात् वसन्त एव रसराजमण्डितः खलु। अथर्ववेदेऽप्युक्तमेव - **'या रसस्य हरणाय'**[7] इत्यत्ररसस्यार्थः शोणितो गृहीतः। अपि च - **'तां रसेनाभिवर्धताम्'**[8] मन्त्रेऽस्मिन् रसशब्दः मधु-दधि-घृतादिष्वर्थेषु प्रयुक्तः। इत्थमथर्ववेदे अनेकशः प्रयुक्तः रसशब्दः पूर्वोक्तानर्थान् प्रकट्यति परिचायति वा।

ततः शृङ्गारादि-रसानधिकृत्य विविधासु भाषासु यद्विपुलं साहित्यमाविर्भूतम्। तेषां खलु रसानां बीजं वेदमन्त्रेष्वुपलभ्यते । ऋग्वेदे सोमरसस्य प्रयोगः दुग्धार्थे जलार्थे चाभूताम्। यद्यपि न हि तत्र रसस्य काव्यशास्त्रीयं विवेचनम्, तथापि विभिन्नरसानामुद्धहरणानि समुपलभ्यन्ते इन्द्रस्यविजयोपलक्ष्ये वीरस्य, पराभूतासुर विलापे करुणस्य, उषायाः रमणीयवर्णनावसरे च शृङ्गारस्य रसस्याभिव्यक्तिर्जायते। यथोक्तम् - **'स्वादुरसो मधुपेयो वराय'**[9] अर्थात् हे इन्द्र ! तुभ्यं मधुसमं स्वादु पेयोऽयं सोमरसः अस्ति। इत्यत्र रसस्य रसनीयत्वं काव्यशास्त्रीयरसनीयत्वस्य बीजं स्वीकर्तुं शक्यते । एवमेव अमृततुल्यार्थे **'सोम इन्द्रियो रसः'**[10] **तथा इन्द्रियवर्धकार्थे 'सोम इन्द्रियो रसः' तथा इन्द्रियवर्धकार्थे**[11] **इत्यादि-मन्त्रेषु प्रयुक्तोऽभूत्।**

एवमेव **'दधानः कलशे रसम्'**[12] इत्यत्र व्रततिर्निष्यन्दार्थे रस शब्दस्य प्रयोगश्चकार। इत्थं रसशब्देन रसनेन्द्रियग्राह्यं जलं शृङ्गारादिरसाः, सोमादिपदार्थाश्च प्रतीयन्ते। एतदतिरिक्तं ऋग्वेदे वाग्रस रूपेऽपि रसपदव्यवहारोऽभूत्।

एवमेव 'तैत्तिरीयोपनिषदि' परं ब्रह्म रसशब्देनाभिधीयते। तस्य प्राप्त्यनन्तरमेव जीव आनन्दानुभूतिं कुरुते।[13] यायावरीयराजशेखरेण काव्यामीमांसायां लिखितमस्ति यत् रसस्वरूपनिरूपणं सर्वप्रथमा-चार्यनन्दिकेश्वरमहोदयेन कृतमस्ति।[14] परञ्च नन्दिकेश्वरस्य कश्चिदपि ग्रन्थविशेषो नैवोपलभ्यते काव्यजगति। उपलब्धग्रन्थानधिकृत्य आचार्यभरत एव रसस्यादिमोऽऽचार्यः। यतो हि अनेन नाट्यशास्त्रस्य षष्ठे सप्तमे चाध्याये रसस्य मनोवैज्ञानिकपद्धत्या विवेचनं कृतम् । महामुनेः भरतस्य मतमस्ति यत् रसात् विना काव्येऽर्थो न प्रवर्तते ।[15] अभिनवगुप्तस्य कथनमस्ति यत् निखिले रूपके नाटके वा रसः केवलं सूत्रमिव प्रतीयते ।[16] अस्य कथनमस्ति यत् नाट्यमेव रसोऽस्ति। एवं रस समुदायो हि नाट्यमस्ति ।[17]

आचार्यभरतेन 'अष्टौ रसाः' इत्यस्य स्थाने 'अष्टौ नाट्यरसा' इति निगदितम्। अस्यैव रससिद्धान्तः प्रायः सर्वैरुत्तरवर्तिभिराचार्यैः समर्थितः। भामह-दण्डी-रूद्रटादिभिराचार्यैः काव्य-नाटकयोः भेदः कृतः। अत एव समे आचार्याः यद्यपि रससिद्धान्तात् परिचिता आसन्, तथापि एभिराचार्यैः नाट्य एव रसस्यापरिहार्या स्थितिः स्वीकृता । पूर्वोक्तैराचार्यैः काव्ये रसानामलङ्कारेष्वेव समावेशो विहितः।

संस्कृतकाव्यशास्त्रे रसशब्दस्य प्रयोगः विविधेष्वर्थेष्वभूत्। कोषग्रन्थेषु रसशब्दस्यानेके अर्थाः सन्ति यथा - स्वादः, जलम्, वीर्यम्, शृङ्गारादयश्च काव्यरसाः, विषः, द्रवः, पारदः, रागः, तिक्तादयश्च भोज्यरसाः। उपनिषत्सु परमात्मनः कृतेऽपि रसपदस्य व्यवहारो अभूत्। यथा तैत्तिरीयोपनिषदि परमात्मा रसशब्देनाभिधीयते । यतः तत्प्राप्त्यनन्तरमेवानन्दानुभूतिर्जायते।

वैदिकसाहित्ये शृङ्गारादीनां साहित्यिकरसानां कृतेऽपि रसशब्दस्य प्रयोगो वर्तते। आचार्यभरतेन वेदेभ्यो रसस्य ग्रहणं कृतमस्ति। यथा -

**'जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च ।**
**यजुर्वेदादभिनयान् रसानथर्वणादपि ॥'**[18]

व्याकरण शास्त्रानुसारं रसशब्दस्य व्युत्पत्तिश्चतुर्धा यथा –

'रस्यते आस्वद्यते इति रसः' व्युत्पत्यानुसारेण आस्वाद्यमानाः सोमगन्धमध्वादयः पदार्थाः रसशब्देन कथयितुं शक्यन्ते।

'रस्यते अनेन इति रसः; एषां पदार्थानामास्वादनं क्रियते ते रसाः कथ्यन्ते। एवं राग-वीर्य-शरीरादिकञ्च रसः कथ्यते।

'रसति रसयति वा रसः' यो व्याप्यते व्याप्नोति वा स रस इति कथ्यते।

'रसनं रसः आस्वादः' यः आस्वादः स रस उच्यते। एतदनुसारेण शृङ्गारादयो रसाः कथ्यन्ते ।

काव्यानां रसात्मकतां प्रतिपादयितुं वाल्मीकिरामायणस्य दृष्टान्तः प्रस्तुयते यत्

**'मा निषाद प्रतिष्ठां त्वमगमः शाश्वती समाः।**
**यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥'**[19]

यदा महर्षिवाल्मीकिः स्नानार्थ तमसां नदीं जगाम्, तदा मार्गे तेनावलोकितं यत्

केनचित् व्याधेन कामपीडितक्रौञ्चयुग्लात् एकतरक्रौञ्चः बाणेन व्यापाद्य भूमौ पातितः। क्रौञ्चपत्न्या अत्यधिको विलापो विहितः। तस्याः कारुणिकं विलापमाकर्ण्य वाल्मीकिः करुनार्द्रचेतोऽभूत्। महर्षेर्वाल्मीकेः स शोक एव श्लोकरूपे परिणतो बभुव। ध्वन्यालोककारेण आनन्दवर्धनाचार्येण तत्र पद्यमिदं काव्यात्मत्वे-नोररीकृतम् । यथोक्तम् -

**काव्यस्यात्मा स एवार्थस्तथा चादि कवेः पुरा ।**
**क्रौञ्चद्वन्द वियोगोत्थः शोकः श्लोकत्वमागत ॥**[20]

महाकविवाल्मीकिप्रणीतं रामायणमादिकाव्यमास्ते। यद्यपि काव्यमिदं करुणरससिक्तम्, तथापि महाकाव्येऽस्मिन् शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानक-अद्भुत- वीभत्स-शान्तादीनां समेषां रसानां सन्निवेशो-ऽस्ति ।[21]

**रसस्य काव्यशास्त्रीयं विवेचनम् -**

भारतीयकाव्यशास्त्रेतिहासे सर्वप्रथमं नाट्यशास्त्रकारेणाचार्य-भरतेन रसस्वरूपस्य, तस्यानुभूतेश्च वर्णनं कृतमासीत्। ततः भरतादुत्तरवर्तिभिराचार्यैः रसविषये यद् विवेचितं तत्सर्वं भरतरससूत्रमाधारीकृत्यैव प्रस्तुतमस्ति। भरताभिमतरसस्वरूपं यथा **'विभानुभावव्यभिचारिसंयोगाद्रसनिष्पतिः'**[22] अर्थात् विभावानुभाव-व्यभिचारिसंयोगात् रसस्य निष्पत्तिः उत्पत्तिर्भवति। सूत्रस्यास्य व्याख्यां कुर्वता भरतेन प्रतिपादितं यत् यथा नानाव्यञ्जनसंस्कृतमन्नं भुञ्जानः रसानास्वादयन्ति सुमनसः पुरुषाः हर्षादींश्चाधिगच्छन्ति, तथा - नानाभावाभिनयव्यञ्जितान् वागङ्गसत्त्वोपेतान् स्थायिभावान् आस्वादयन्ति सुमनसः प्रेक्षकाः हर्षादींश्चाधिगच्छन्ति ।[23]

अपि च **'यथा गुडादिद्रव्येभ्यो व्यञ्जनेभ्य औषधीभ्यः षड् रसा उत्पद्यन्ते, तथैव विविधभावैर्युक्तो भूत्वा रसरूपतां प्राप्नोति। ('यथा नानाव्यञ्जनौषधिद्रव्यसंयोगाद्रसनिष्पत्तिस्तथा नाना भावोपगमाद्र-सनिष्पत्तिः। यथा गुडादिभिर्द्रव्यैर्व्यञ्जनौषधिभिश्च पारदादयो रसाः निवर्त्यन्ते तथा नानाभावोपगता अपि स्थायिनो भावाः रसत्वमाप्नुवन्ति।'**[24] रसनिष्पत्तिसम्बन्धे अन्यैः सवैराचार्यैः भारताभि-मतरससूत्रस्यैवानुकरणं कृतमस्ति। उक्तं च मम्मटेन -

**कारणान्यथ कार्यणि सहकारीणि यानि च।**
**रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः॥**
**विभावाऽनुभावास्तत् कथ्यन्ते व्यभिचारिणः।**

**व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः॥**[25]

अर्थाद् लौकिकव्यवहारे रत्यादिस्थायिभावस्य ये कारण-कार्य-सहकारिणो भवन्ति, त एव काव्यनाटकयोः विभावानुभावव्यभिचारिभावाः कथ्यन्ते। तैरेव विभावादिभिः व्यक्तो भूत्वा स्थायीभावो रसः कथ्यते। एवमेव साहित्यदर्पणकारेण विश्वनाथेन रसस्य निष्पन्नता एवं प्रदर्शिताऽस्ति, यत् विभावानुभाव व्यभिचारिभावैरभिव्यक्तः सन् रत्यादिस्थायिभावः सहृदयानाम् कृते रसत्वमाप्नोति ।[26] यथा -

**विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा।**
**रसतामेति रत्यादिस्थायिभावः सचेतसाम्॥**

रसभावयोश्च परस्परं पोषकत्वम्। न भावहीनो रसः, न च रसहीनो भावः । एवं द्वावपि परस्परं भावयतः ।[27] अपि च यथा बीजं वृक्षपुष्पादेः मूलं तथैव रसः सर्वेषां भावानां मूलम् ।[28]

आचार्य भरताभिमत रससूत्रस्य तत्तदाचार्यैः पृथक्-पृथक् व्याख्या कृताऽस्ति। विभावानुभावव्यभिचारिभावानां व्याख्याने नास्ति किमपि वैमत्यम्, किन्तु 'संयोगात्' एवं 'निष्पत्तिः' इत्यनयोर्द्वयोः पदयोः व्याख्याने विदूषां विमतिरस्ति । यद्यपि पण्डितराजजगन्नाथेनाष्टविधा व्याख्या प्रस्तुतीकृतास्ते तथापि तासु व्याख्यासु चतस्रो व्याख्या विशेषत उल्लेखनीयाः सन्ति। अतोऽत्र समासतः तासां प्रस्तुतीकरणं विधीयते।

१.**श्रीभट्टलोल्लटः** -रससूत्रस्यादिमो व्याख्याता तत्रभवान् 'आचार्यभट्ट-लोल्लटः' वर्तते। अस्य मतञ्च 'उत्पतिवाद' नाम्ना ख्यातम् साहित्य-शास्त्रे। आचार्येणानेन संयोगादित्यस्य पदस्यार्थ उत्पाद्योत्पादक-भावसम्बन्धात् एवं 'निष्पतिः' इत्यस्य पदस्यार्थ उत्पतिरिति कृतोऽस्ति। अर्थात् विभावानुभावव्यभिचारिभावानामुत्पाद्योत्पादक-भावसम्बन्धात् रसस्योत्पत्तिर्भवति। अत्र संयोगशब्दस्य निष्पत्ति-शब्दस्य च अर्थत्रयं गृह्यते।

(१) विभावैः सह स्थायिभावानां उत्पाद्य-उत्पादकभावः सम्बन्धः, तेन रसस्य निष्पत्तिः उत्पतिरित्यर्थः।

(२) अनुभावैः सह स्थायिभावानां गम्य-गमकसम्बन्धः, तेन रसस्य निष्पत्तिः प्रतीतिरित्यर्थः ।

(३) व्यभिचारिभावैः सह स्थायिभावानां पोष्य-पोषकभावसम्बन्धः, तेन रसस्य निष्पत्तिः पुष्टिरित्यर्थः।

२.**श्रीशङ्कुकः** - आचार्यभरतस्य रससूत्रस्यापरो व्याख्याता 'आचार्य-शङ्कुकः' अस्ति । असौ रससूत्रस्यानुभूतिमनुमानेन स्वीचक्रे । शङ्कुकः न्यायसम्मतम् अनुमितिवादं प्रस्तौति। अस्य मतम् 'अनुमितिवादः' इति नाम्ना विख्यातमस्ति आचार्येणानेन 'संयोगात्' इति पदस्य 'अनुमाप्यानुमापकभावसम्बन्धात्' इत्यर्थः स्वीकृतः, एवं निष्पत्तिः' इति पदस्यार्थः 'अनुमितिः' इति स्वीकृतः। तन्मूला च रसानुभूतिः।

३. **श्रीभट्टनायकः** - 'आचार्यभट्टनायकः' न हि रसस्योत्पतिं नानुमितिञ्च स्वीचकार। तन्मते संयोगस्याभिप्रायो भोज्यभोजकभावोऽस्ति, निष्पत्तेः तात्पर्यं च 'भुक्तिः' वर्तते। रसानुभूति-प्रक्रियाया अवस्थात्रयम् - अभिधा भावकत्वं, भोजकत्वञ्च। अस्य कथनमस्ति यत् प्रथमं अभिधा शक्त्या समेषां पदार्थानां बोधः क्रियते - ततश्च भावकत्वव्यापारेण तेषां साधारणीकरणं क्रियते, साधारणी-करणानन्तरं भोजकत्वव्य-पारेण रसस्य भुक्तिः क्रियते, अर्थात् रत्यादिस्थायिभावानां विभावा-दिभिः संयोगाद् भोज्यभोजकभाव-रूपात् सम्बन्धात् रसस्य निष्पत्तिर्भुक्तिरिति। तन्मते भोज्य भोजकभावसम्बन्धात् रसस्य भुक्तिर्भवति। अस्य मतञ्च भुक्तिवाद नाम्ना प्रचलितमास्ते ।

**अभिनवगुप्तपादाचार्यः** - भरतसूत्रस्यान्तिमः सर्वमानश्च व्याख्याता अभिनवगुप्तवादाचार्योऽस्ति। परवर्तिभिराचार्यैरस्यैव मतमनुमोदितम्। अनेन 'संयोगात्' इति शब्दस्य व्यङ्ग्य-व्यञ्जकभावसम्बन्धात्" इत्यर्थः कृतः। एवं 'निष्पतिः' इति पदस्यार्थः अभिव्यक्तिरित्यर्थः स्वीकृतः। अस्य मतमिदमास्ते यत् अभिधाशक्त्या गम्यमानपदार्थानां साधारणीकरणव्यापारबलेन साधारणीकरणं विधीयते। साधारणी-कृतानां विभावानुभावव्यभिचारिभावानां संयोगात् विभावादिभिः रजस्तमसोऽभिभूय सत्त्वगुणस्योद्रेकात् तत्र साधारणीकरण-व्यापारबलेन रसस्य निष्पत्तिरभिव्यक्तिर्वा भवति। यद्यपि अन्येऽपि रससूत्रस्यानेके व्याख्यातारः सञ्जाताः, परं तेषु काव्यप्रकाशकर्तुः मम्मटस्य स्थानं मूर्धन्यमस्ति। रससूत्रस्य व्याख्यायां अभिनवगुप्तस्यैव समर्थनं कृतमालोचकैः। अनेन स्वकीये काव्यलक्षणे 'सगुणौ' इत्यभिधाय रसस्य समर्थनं कृतमस्ति।

आचार्यभरतेन नाट्यशास्त्रे उच्यते - **न हि रसाद् ऋते कश्चिदर्थः प्रवर्तते।**[29] अपि च कथं रसनिष्पत्तिरिति जिज्ञासायां तेनोच्यते - **'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पतिः।'** अत्र विभावाः कारणानि, अनुभावाः कार्याणि, व्यभिचारिणश्च सहकारिणः। एषां संयोगाद् रसस्य निष्पत्तिः। अतोऽधुना विभावादीनां निरूपणं प्रस्तूयते-

**'विभव्यतेऽनेन वागङ्गसत्त्वाभिनया इति विभावः।**
**यथा विभावितं विज्ञातार्थमित्यर्थान्तरम्॥'**[30]

**भावविवेचनम् -** भावस्याधारभूमावेव रसप्रासादोऽधितिष्ठति । अतः भावविवेचनं नितान्तं श्रेयस्करम्। एतदभिलक्ष्यैव नाटयशास्त्रस्य सप्तमाध्याये पितामहेन भरतेन भावशब्दः परिभाषितः। यथा -'भावो मनसो विकारः' अर्थात् मनसः विकृतिरेव भावः। अपि च -भावा इति कस्मात्। किं भवन्तीति भावाः किं वा भावयन्तीति भावाः। उच्यते - **'वागङ्गसत्वोपेतान्काव्यार्थान्भावयन्तीति भावा इति।'**[31] अर्थात् वागर्थसत्त्वोपातान् काव्यार्थान् भाक्तित्वात् अमी भावा इत्युच्यन्ते। लोके यथा अनेन गन्धेन रसेन वा सर्वमपि वस्तुजातं भावितम् । इत्यत्र भावितमित्यस्यार्थः परिव्याप्तं सिद्धयति। स्वाभिप्रायं स्पष्टं कुर्वता

कथितमनेन यत् योऽर्थः विभावैः निष्पन्नो भूत्वा अनुभावैः एवं वाचिकाङ्गिकसात्त्विकाभिनयैः प्रतीतियोग्यो भवत्यसौ भाव उच्यते । यथोक्तम् -

**'विभावैराहृतो योऽर्थो अनुभावैस्तु गम्यते।**
**वागङ्गसत्त्वाभिनयैः स भाव इति सञ्ज्ञितः॥**
**वागङ्गमुखरागेण सत्त्वेनाभिनयेन।**
**कवेरन्तर्भावं भावयन्भाव उच्यते॥'**[32]

**विभावः** - आचार्यभरतानुसारं विभावो विज्ञानार्थः । विभावोऽयं स्थायी-भावानां हेतुः । कायिक-वाचिक-सात्विकाभिनयानां विभावनं (ज्ञानं) येन भावत्यसौ विभावः । यथा कथितम् -

**'बहवोऽर्था विभाव्यन्ते वागङ्गाभिनयाश्रयाः।**
**अनेन यस्मात्तेनायं विभाव इति सञ्ज्ञितः ॥'**[33]

आचार्यविश्वनाथस्य मतानुसारेण लोके रत्यादेरुद्बोधकाः पदार्थाः काव्ये विभावा इति कथ्यन्ते । विभावा आलम्बनोद्दीपनभेदात् द्विविधा भवन्ति ।[34]

**आलम्बनविभावाः** - नायकनायिकादिपात्रविशेषा आलम्बनविभावाः कथ्यन्ते । यतस्तेषामालम्बनेन रस उत्पद्यते ।[35]

**उद्दीपनविभावाः** - स्थायिभावस्योद्दीपक-विभावाः तत्रोद्दीपनविभावाः कथ्यन्ते । नायक-नायिकादिभिः सम्बन्धिताः देश-काल-चन्द्रोदय-पर्वत-नदी-वन-वसन्तर्त्वादय उद्दीपनविभावाः कथ्यन्ते । साहित्यदर्पणे कथितमस्ति यत्

**उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये ।**
**आलम्बनस्य चेष्टादयः देशकालादयस्तथा ॥**[36]

**अनुभावाः -** अनु पश्चात् भवन्तीति अनुभावाः[37] उद्दीप्यनन्तरं मनसो भावनाः विभिन्नविकारेषु उद्भवन्ति । अनुभूयमानत्वादेते अनुभावाः कथ्यन्ते । साहित्यदर्पणे कथितमस्ति यत् -

**'उद्बुद्धैः कारणैः स्वैः स्वैर्वहिर्भावं प्रकाशयन्।**
**लोकैः यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः॥'**[38]

यथा कारणानन्तरं कार्यं भवति, तथैव विभावानन्तरमनुभावाः भवन्ति। अमीः स्तम्भ-रोमाञ्चादय अष्टसङ्ख्यका सन्ति । यथा -

**स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः।**
**वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः॥**[39]

आचार्यविश्वनाथः सत्त्वोद्रेकात्संभूतान्मनोविकारान् सात्विकभावाः मनुते ।[40]

**व्यभिचारिभावाः** -'वि' 'अभि' उपसर्गपूर्वकात् चर् धातोः विनि प्रत्यये कृते निष्पद्यते शब्दोऽयम् । यथा जले बुदबुदोतिष्ठते, निलीयते च तथैव ये भावाः क्षणे-क्षणे उत्पद्यन्ते निलीयन्ते च। ते व्यभिचारिभावाः कथ्यन्ते। सञ्चरनशीलत्वादमीः सञ्चारीभावा अपि कथ्यन्ते ।[41] अमीः भावाः त्रयश्चित्रंशत्संख्यकाः निगदिताः।[42]

**स्थायिभावाः** - मानवदैनिके जीवने यत् पश्यति, यत्शृणोति, यदनुभवति, तस्य यः संस्कारः मनसि स्थिरो भवति। संस्कारोऽयं वासनेत्यप्यभिधीयते । अयं वासनारूपं संस्कार एव स्थायिभावः कथ्यते । साहित्यदर्पणे कथितमस्ति यत्

**विरुद्धा अविरुद्धा वा यं तिरोधातुमक्षमाः।**
**आस्वादाङ्कुरः सञ्ज्ञाऽसौ भावः स्थायीति सम्मतः ॥**[43]

आचार्यभरतेन नाट्यशास्त्रे अष्टौ स्थायिभावाः प्रोक्ताः सन्ति। मम्मटाचार्यस्य काव्यप्रकाशे नाट्यशास्त्रस्य कारिकामुदाहृत्य अष्टौ स्थायिभावाः स्वीकृताः सन्ति। परञ्च आचार्यविश्वनाथरचिते साहित्यदर्पणे नवस्थायिभावानां विवेचनमुपलभ्यते ।[44]

**रसस्यभेदाः** - रससङ्ख्याविषये नास्ति विदुषां मतैक्यम् । केचनाष्टौ रसाः, अन्ये नवरसाः, अपरे वत्सलोपेताः दशरसा इतरे च एकादश रसा इत्यामनन्ति। पितामहेन भरतेनाष्टौ रसाः स्वीकृताः।[45] भरतानन्तरम् आचार्यदण्डिनाऽपि अष्टावेव रसाः स्वीकृताः। आचार्यो-द्भट्टेन 'नवरसाः स्वीकृताः, तेन शान्ताभिधानस्य नवमरसस्योल्लेखः कृतः । यथा -

**शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।**
**बीभत्साद्भुतशान्तश्च नव नाट्ये रसाः स्मृताः॥**

आचार्यरुद्रटमहोदयोऽपि स्वरचिते 'शृङ्गारतिलके' नवसानामुल्लेख-ञ्चक्रे। नाट्यशास्त्रस्य प्रसिद्धव्याख्याताभिनवगुप्तमहोदयो शान्तरस-स्यापि विवेचनञ्चकार। दशरूपककारेण धनञ्जयेन 'नाट्यार्थमष्टौ रसाः' इत्युक्त्वा शान्तरसस्य खण्डनचक्रे ।[46]

वाग्देवताऽवतारेण मम्मटभट्टेन नाट्येऽष्टौ रसा इति उररीकृत्य शान्तोऽपि नवमो रसः स्वीकृतः।[47] प्रायः शान्तरसस्य विषये विदुषां विमतिरस्ति, परं उद्भट्टादिभिराचार्यैः स्फुटरूपेण शान्तरसस्योल्लेखः कृतः। आचार्यविश्वनाथोऽपि वत्सलरसस्य निरूपणं चकार। एवमनेन काव्ये दशरसाः स्वीकृताः ।[48]

एतदतिरिक्तं केचन निष्णाताः भक्तिमपि पृथक् रसत्वेनोररीकुर्वते। अस्य स्थापना साहित्यक्षेत्रे नास्ति, अपि तु धार्मिकक्षेत्रेऽस्ति। साहित्ये अस्य गणना देवविषयकरतिरूपे भवति। किन्तु वैष्वाचार्येण भक्तिर-सस्य मुक्तकण्ठेन प्रतिष्ठा कृतास्ते। एतेष्वाचार्येषु रूपगोस्वामीमधु-सूदनश्च प्रमुखौ विद्येते।

**पाद टिप्पणी:**

[1] अभिनवभारती, पृष्ठसङ्ख्या - २८८, अमरकोषः, नानार्थवर्गः - २२७

[2] ऋग्वेदः, १.१०५.१

[3] ऋग्वेद, ९.६७.३

[4] ऋग्वेदः, ९.८४.५

[5] ऋग्वेदः,१०.९.२

[6] यजुर्वेदः, २.३२

[7] अथर्ववेदः, १.२८.३

[8] अथर्ववेदः,६.६७.१

[9] ऋग्वेदः, ६.२२.४४, ऋग्वेदः, ३.८.१

[10] ऋग्वेदः, ८.३.२०, ऋग्वेदः, ९.४७.३

[11] ऋग्वेदः, ९.३८,५

[12] ऋग्वेदः, ९.६३.१३

[13] रसो वैः स रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति ।' तैत्तिरीयोपनिषत्, २.७

[14] 'रूपकं निरूपणीयं भरतः रसाधिकारिकं नन्दिकेश्वरः ।'
काव्यमीमांसा, पृष्ठसङ्ख्या - ४,५

[15] 'न हि रसादृते कश्चदर्थः प्रवर्तते ।' नाट्यशास्त्रम्, अध्यायः - ६

[16] 'एक एव परमार्थतो रसः सूत्रस्थानीयत्वेन रूपकेप्रतिभाति ।'
अभिनवभारतीटीकायाम्

[17] 'नाट्यात् समुदायरूपाद् रसाः।
यदि वा नाट्यमेव रसाः ॥'
'रस समुदायो हि नाट्यम् ।
न नाट्य एव च रसाः काव्येऽपि ॥'
नाट्यशास्त्रम्, अध्यायः - ६ (अभिनवभारती टीकायाम्)

[18] भरतनाट्यशास्त्रम्,१.१७

[19] वाल्मीकिरामायणम् १.२.१५

[20] ध्वन्यालोकः,१.५

[21] 'शोकार्तस्य प्रवृत्तो मे श्लोकः भवतु नान्यथा ।' रामायणम्,१.२.४०

[22] नाट्यशास्त्रम्, पृष्ठसङ्ख्या - २२८

[23] नाट्यशास्त्रम्, अध्यायः - ६

[24] नाट्यशास्त्रम्, ६.२

[25] काव्यप्रकाशः, ४.२७-२८

[26] साहित्यदर्पणम्, ३.१

[27] नाट्यशास्त्रम्, ६.३७

[28] नाट्यशास्त्रम्, ६.३९

[29] नाट्यशास्त्रम्, ६.३२

[30] नाट्यशास्त्रम्, अध्यायः - ६, पृष्ठसङ्ख्या - ३४६

[31] नाट्यशास्त्रम्, पृष्ठसङ्ख्या - ३६७

[32] नाट्यशास्त्रम्, ७.१-२

[33] नाट्यशास्त्रम्, ७.४

[34] रत्याद्युद्बोधकाः लोके विभावः काव्यनाट्ययोः।
लम्बनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ ॥' नाट्यशास्त्रम्, ३.२९

[35] 'आलम्बनो नायकादिस्तमालम्ब्य रसोद्गमात् ।' साहित्यदर्पणम्, ३.२९

[36] साहित्यदर्पणम्, ३.१३१

[37] 'अनुभावो विकारस्तु भाव संसूचनात्मकः ।' दशरूपकम्, ४.३

[38] साहित्यदर्पणम्, ३.१३१

[39] नाट्यशास्त्रम्, ६.

[40] 'विकाराः सत्त्वसम्भूताः सात्त्विकाः प्रकीर्तिताः ।' साहित्यदर्पणम्, ३.१३४

[41] नाट्यशास्त्रम्, पृष्ठे ३९०

[42] 'निर्वेदग्लानिर्शङ्काख्याऽसूयामदश्रमाः' इत्यादयः । नाट्यशास्त्रम्, ६

[43] साहित्यदर्पणम्, ३.१७४

[44] रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगप्सा विस्मयश्चेति चेत्यष्टौ प्रोक्ताः शमोऽपि च ॥
साहित्यदर्पणम्, ३.१७५

[45] शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
विभत्साद्भुतसञ्ज्ञौ चेत्यष्टौ नाट्यरसाः स्मृताः॥
नाट्यशास्त्रम्, ६.१५)

[46] शममपि केचित्प्राहुः पुष्टिर्नाट्येषु नैतस्य।' दशरूपकम्, ५.३५

[47] 'निर्वेदः स्थायिभावोऽस्ति शान्तोऽपि नवमो रसः' काव्यप्रकाशः, ४.३५

[48] स्फुटं चमत्कारितया वत्सलं च रसं विदुः ।
स्थायी पुत्रलतास्नेहः पुत्राद्यालम्बनं मतम् ॥ साहित्यदर्पणम्, ३.२५